# Siva Sutras

# શ્રીશિવસૂત્રાણિ

## Document Information

Text title : shivasUtrANi

File name : shivasutra.itx

Category : sUtra, shiva, svara, kAshmIrashaivadarshanam

Location : doc_shiva

Proofread by : Ruma Dewan

Description-comments : 1 shaambhavopaaya 2 shaaktopaaya 3 aaNavopaaya

Latest update : 1999, September 15, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 15, 2023

*sanskritdocuments.org*

# શ્રીશિવસૂત્રાણિ

॥ શિવસૂત્રાણિ ॥

ઉન્મેષ સૂત્ર ક્રમ-સઙ્ખ્યા

| | | |
|---|---|---|
| ૧ | શામ્ભવોપાય | ૧-૨૨ |
| ૨ | શાક્તોપાય | ૧-૧૦ |
| ૩ | આણવોપાય | ૧-૪૫ |

॥ ૐ નમશ્શમ્ભવે સ્વાત્માનન્દપ્રકાશવપુષે ॥

અથ શિવસૂત્રાણિ ।

## પ્રથમોન્મેષઃ શામ્ભવોપાયઃ

ચૈતન્યમાત્મા ॥ ૧॥

(ચૈતન્યમ્ આત્મા)

જ્ઞાનં બન્ધઃ ॥ ૨॥

(જ્ઞાનમ્ બન્ધઃ)

યોનિવર્ગઃ કલાશરીરમ્ ॥ ૩॥

(યોનિ-વર્ગઃ કલા-શરીરમ્)

જ્ઞાનાધિષ્ઠાનં માતૃકા॥ ૪॥

(જ્ઞાન અધિષ્ઠાનમ્ માતૃકા)

ઉદ્યમો ભૈરવઃ ॥ ૫॥

(ઉદ્યમઃ ભૈરવઃ)

શક્તિચક્રસન્ધાને વિશ્વસંહારઃ ॥ ૬॥

(શક્તિ-ચક્ર-સન્ધાને વિશ્વ-સંહારઃ)

જાગ્રત્સ્વપ્નસુષુપ્તભેદે તુર્યાભોગસમ્ભવઃ ॥ ૭॥

(જાગ્રત્ સ્વપ્ન સુષુપ્તિ ભેદે તુર્ય આભોગ સમ્ભવઃ)

જ્ઞાનં જાગ્રત્ ॥ ૮॥

(જ્ઞાનમ્ જાગ્રત્)

સ્વપ્નો વિકલ્પાઃ ॥ ૯॥

(સ્વપ્નઃ વિકલ્પાઃ)

અવિવેકો માયાસૌષુપ્તમ્ ॥ ૧૦॥

(અવિવેકઃ માયા સૌષુપ્તમ્)

ત્રિતયભોક્તા વીરેશઃ ॥ ૧૧॥

(ત્રિતય-ભોક્તા વીરેશઃ)

વિસ્મયો યોગભૂમિકાઃ ॥ ૧૨॥

(વિસ્મયઃ યોગ-ભૂમિકાઃ)

ઇચ્છાશક્તિરુમા કુમારી ॥ ૧૩॥

(ઇચ્છા-શક્તિઃ ઉમા કુમારી)

દૃશ્યં શરીરમ્ ॥ ૧૪॥

(દૃશ્યમ્ શરીરમ્)

હૃદયે ચિત્તસઙ્ઘટ્ટાદ્દૃશ્યસ્વાપદર્શનમ્ ॥ ૧૫॥

(હૃદયે ચિત્ત-સઙ્ઘટાત્ દૃશ્ય-સ્વાપ-દર્શનમ્)

શુદ્ધતત્ત્વસન્ધાનાદ્વાઽપશુશક્તિઃ ॥ ૧૬॥

(શુદ્ધ-તત્ત્વ સન્ધાનાત્ વા અ-પશુ-શક્તિઃ)

વિતર્ક આત્મજ્ઞાનમ્ ॥ ૧૭॥

(વિતર્ક આત્મ-જ્ઞાનમ્)

લોકાનન્દઃ સમાધિસુખમ્ ॥ ૧૮॥

(લોક-આનન્દઃ સમાધિ-સુખમ્)

શક્તિસન્ધાને શરીરોત્પત્તિઃ ॥ ૧૯॥

(શક્તિ-સન્ધાને શરીર ઉત્પત્તિઃ)

ભૂતસન્ધાનભૂતપૃથક્ત્વવિશ્વસઙ્ઘટ્ટાઃ ॥ ૨૦॥

(ભૂત-સન્ધાન ભૂત-પૃથક્ત્વ વિશ્વ-સઙ્ઘટ્ટાઃ)

શુદ્ધવિદ્યોદયાચ્ચક્રેશત્વસિદ્ધિઃ ॥ ૨૧॥

(શુદ્ધ-વિદ્યા ઉદયાત્ ચક્ર-ઈશત્વ-સિદ્ધિઃ)

મહાહ્રદાનુસન્ધાનાન્મન્ત્રવીર્યાનુભવઃ ॥ ૨૨॥

(મહા-હ્રદ અનુસન્ધાનાત્ મન્ત્ર-વીર્ય અનુભવઃ)

ઇતિ શામ્ભવોપાયાખ્યે પ્રથમોન્મેષસૂત્રાણિ ।

## દ્વિતીયોન્મેષઃ શાક્તોપાયઃ

ચિત્તં મન્ત્રઃ ॥ ૧॥

(ચિત્તમ્ મન્ત્રઃ)

પ્રયત્નઃ સાધકઃ ॥ ૨॥

(પ્રયત્નઃ સાધકઃ)

વિદ્યાશરીરસત્તા મન્ત્રરહસ્યમ્ ॥ ૩॥

(વિદ્યા-શરીર-સત્તા મન્ત્ર-રહસ્યમ્)

ગર્ભે ચિત્તવિકાસોઽવિશિષ્ટવિદ્યાસ્વપ્નઃ ॥ ૪॥

(ગર્ભે ચિત્ત-વિકાસઃ અવિશિષ્ટ-વિદ્યા-સ્વપ્નઃ)

વિદ્યાસમુત્થાને સ્વાભાવિકે ખેચરી શિવાવસ્થા ॥ ૫॥

(વિદ્યા-સમુત્થાને સ્વા-ભાવિકે ખેચરી શિવ-અવસ્થા)

ગુરુરુપાયઃ ॥ ૬॥

(ગુરુઃ ઉપાયઃ)

માતૃકાચક્રસમ્બોધઃ ॥ ૭॥

(માતૃકા-ચક્ર-સમ્બોધઃ)

શરીરં હવિઃ ॥ ૮॥

(શરીરમ્ હવિઃ)

જ્ઞાનમન્નમ્ ॥ ૯॥

(જ્ઞાનમ્ અન્નમ્)

વિદ્યાસંહારે તદુત્થસ્વપ્નદર્શનમ્ ॥ ૧૦॥

(વિદ્યા-સંહારે તત્-ઉત્થ સ્વપ્ન-દર્શનમ્)

ઇતિ શાક્તોપાયાખ્યે દ્વિતીયોન્મેષસૂત્રાણિ ।

## તૃતીયોન્મેષઃ આણવોપાયઃ

આત્મા ચિત્તમ્ ॥ ૧॥

(આત્મા ચિત્તમ્)

જ્ઞાનં બન્ધઃ ॥ ૨॥

(જ્ઞાનમ્ બન્ધઃ)

કલાદીનાં તત્ત્વાનામવિવેકો માયા ॥ ૩॥

(કલા-આદિનામ્ તત્ત્વાનામ્ અવિવેકો માયા)

શરીરે સંહારઃ કલાનામ્ ॥ ૪॥

(શરીરે સંહારઃ કલાનામ્)

નાડીસંહારભૂતજયભૂતકૈવલ્યભૂતપૃથક્ત્વાનિ ॥ ૫॥

(નાડી-સંહાર ભૂતજય-ભૂતકૈવલ્ય-ભૂતપૃથક્ત્વાનિ)

મોહાવરણાત્સિદ્ધિઃ ॥ ૬॥

(મોહ+આવરણાત્ સિદ્ધિઃ)

મોહજયાદનન્તાભોગાત્સહજવિદ્યાજયઃ ॥ ૭॥

(મોહ-જયાત્ અનન્ત આભોગાત્ સહજ-વિદ્યા-જયઃ)

જાગ્રદ્દ્વિતીયકરઃ ॥ ૮॥

(જાગ્રત્ દ્વિતીય કરઃ)

નર્તક આત્મા ॥ ૯॥

(નર્તક આત્મા)

રઙ્ગોઽન્તરાત્મા ॥ ૧૦॥

(રઙ્ગઃ અન્તરાત્મા)

પ્રેક્ષકાણીન્દ્રિયાણિ ॥ ૧૧॥

(પ્રેક્ષકાણિ ઇન્દ્રિયાણિ)

ધીવશાત્સત્ત્વસિદ્ધિઃ ॥ ૧૨॥

(ધી-વશાત્ સત્ત્વ-સિદ્ધિઃ)

સિદ્ધઃ સ્વતન્ત્રભાવઃ ॥ ૧૩॥

(સિદ્ધઃ સ્વતન્ત્ર-ભાવઃ)

યથા તત્ર તથાન્યત્ર ॥ ૧૪॥

(યથા તત્ર તથા અન્યત્ર)

બીજાવધાનમ્ ॥ ૧૫॥

(બીજ અવધાનમ્)

આસનસ્થઃ સુખં હ્રદે નિમજ્જતિ ॥ ૧૬॥

(આસનસ્થઃ સુખમ્ હ્રદે નિમજ્જતિ)

સ્વમાત્રાનિર્માણમાપાદયતિ ॥ ૧૭॥

(સ્વ-માત્રા નિર્માણમ્ આપાદયતિ)

વિદ્યાઽવિનાશે જન્મવિનાશઃ ॥ ૧૮॥

(વિદ્યા અવિનાશે જન્મ-વિનાશઃ)

કવર્ગાદિષુ માહેશ્વર્યાદ્યાઃ પશુમાતરઃ ॥ ૧૯॥

(ક-વર્ગ આદિષુ માહેશ્વરી આદ્યાઃ પશુ-માતરઃ)

ત્રિષુ ચતુર્થં તૈલવદાસેચ્યમ્ ॥ ૨૦॥

(ત્રિષુ ચતુર્થમ્ તૈલવત્ આસેચ્યમ્)

મગ્નઃ સ્વચિત્તેન પ્રવિશેત્ ॥ ૨૧॥

(મગ્નઃ સ્વચિત્તેન પ્રવિશેત્)

પ્રાણસમાચારે સમદર્શનમ્ ॥ ૨૨॥

(પ્રાણ-સમાચરે સમ-દર્શનમ્)

મધ્યેઽવરપ્રસવઃ ॥ ૨૩॥

(મધ્યે અવર પ્રસવઃ)

માત્રાસ્વપ્રત્યયસન્ધાને નષ્ટસ્ય પુનરુત્થાનમ્॥ ૨૪॥

(માત્રા-સ્વપ્રત્યય-સન્ધાને નષ્ટસ્ય પુનઃ ઉત્થાનમ્)

શિવતુલ્યો જાયતે ॥ ૨૫॥

(શિવ તુલ્યો જાયતે)

શરીરવૃત્તિર્વ્રતમ્ ॥ ૨૬॥

(શરીર-વૃત્તિઃ વ્રતમ્)

કથા જપઃ ॥ ૨૭॥

(કથા જપઃ)

દાનમાત્મજ્ઞાનમ્ ॥ ૨૮॥

(દાનમ્ આત્મજ્ઞાનમ્)

યોઽવિપસ્થો જ્ઞાહેતુશ્ચ ॥ ૨૯॥

(યો અવિપસ્થઃ જ્ઞા-હેતુઃ ચ)

સ્વશક્તિપ્રચયોઽસ્ય વિશ્વમ્ ॥ ૩૦॥

(સ્વ-શક્તિ પ્રચયો અસ્ય વિશ્વમ્)

સ્થિતિલયૌ ॥ ૩૧॥

(સ્થિતિ-લયૌ)

તત્પ્રવૃત્તાવપ્યનિરાસઃ સંવેત્તૃભાવાત્ ॥ ૩૨॥

(તત્ પ્રવૃત્તૌ અપિ અનિરાસઃ સંવેતૃ-ભાવાત્)

સુખદુઃખયોર્બહિર્મનનમ્ ॥ ૩૩॥

(સુખ-દુઃખયોઃ બહિઃ મનનમ્)

તદ્વિમુક્તસ્તુ કેવલી ॥ ૩૪॥

(તત્ વિમુક્તઃ તુ કેવલી)

મોહપ્રતિસંહતસ્તુ કર્માત્મા ॥ ૩૫॥

(મોહ-પ્રતિસંહતઃ તુ કર્મ આત્મા)

ભેદતિરસ્કારે સર્ગાન્તરકર્મત્વમ્ ॥ ૩૬॥

(ભેદ-તિરસ્કારે સર્ગ અન્તર કર્મત્વમ્)

કરણશક્તિઃ સ્વતોઽનુભવાત્ ॥ ૩૭॥

(કરણ-શક્તિઃ સ્વતઃ અનુભવાત્)

ત્રિપદાદ્યનુપ્રાણનમ્ ॥ ૩૮॥

(ત્રિપદ-આદિ અનુપ્રાણનમ્)

ચિત્તસ્થિતિવચ્છરીરકરણબાહ્યેષુ ॥ ૩૯॥

(ચિત્ત-સ્થિતિ-વત્ શરીર-કરણ-બાહ્યેષુ)

અભિલાષાદ્બહિર્ગતિઃ સંવાહ્યસ્ય ॥ ૪૦॥

(અભિલાષાત્ બહિઃ ગતિઃ સંવાહ્યસ્ય)

તદારૂઢપ્રમિતેસ્તત્ક્ષયાજ્જીવસંક્ષયઃ ॥ ૪૧॥

(તત્ આરૂઢ પ્રમિતેઃ તત્ ક્ષયાત્ જીવ-સંક્ષયઃ)

ભૂતકઞ્ચુકી તદા વિમુક્તો ભૂયઃ પતિસમઃ પરઃ ॥ ૪૨॥
(ભૂત-કઞ્ચુકી તદા વિમુક્તો ભૂયઃ પતિ-સમઃ પરઃ)

નૈસર્ગિકઃ પ્રાણસમ્બન્ધઃ ॥ ૪૩॥
(નૈસર્ગિકઃ પ્રાણ-સમ્બન્ધઃ)

નાસિકાન્તર્મધ્યસંયમાત્કિમત્ર સવ્યાપસવ્યસૌષુમ્નેષુ ॥ ૪૪॥
(નાસિકા-અન્તર્મધ્ય-સંયમાત્ કિમત્ર સવ્ય-અપસવ્ય સૌષુમણેષુ)

ભૂયઃ સ્યાત્પ્રતિમીલનમ્ ॥ ૪૫॥
(ભૂયઃ સ્યાત્ પ્રતિ-મીલનમ્)

ઇતિ આણવોપાયાખ્યે તૃતીયોન્મેષસૂત્રાણિ ।
॥ ઇતિ વસુગુપ્તેન સમુપાર્જિત શિવસૂત્રાણિ ॥

॥ ઇતિ શિવમ્ ॥

Proofread by Ruma Dewan

*Siva Sutras*

pdf was typeset on September 15, 2023

Please send corrections to *sanskrit@cheerful.com*